दिनाङ्क :- 08.10.2025

प्रात: - 06:55

## प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्याः यशोभूमौ एशिया-महाद्वीपस्य बृहत्तमस्य दूरसञ्चार-माध्यम-तन्त्रज्ञान-कार्यक्रमस्य इण्डिया-मोबाईल्-काङ्ग्रेस्-2025 इत्यस्य नवमस्य संस्करणस्य उद्घाटनं करिष्यति। चतुर्षु दिनेषु आयोजिते कार्यक्रमे अस्मिन् दूरसञ्चारक्षेत्रे उदयोन्मुखप्रौद्योगिकीनां च नवीनतमप्रगतिः प्रदर्शिता भविष्यति, यत्र वैश्विकप्रमुखाः, नीतिनिर्मातारः, उद्योगविशेषज्ञाः, नवप्रवर्तकाः च सम्मिलिताः भविष्यन्ति।

## प्रधानमन्त्री-25 वर्षाणि

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् गतैकादश- वर्षेषु देशे उल्लेखनीयानि परिवर्तनानि अभवन्। सः अवदत् यत्, पथप्रवर्तक-उपक्रमाः सम्पूर्णे देशे महिलानां, यूनां, कृषकाणां च सशक्तीकरणं कृतवन्तः, पञ्चविंशतिकोट्यधिकाः जनाः दारिद्र्यात् मोचिताश्च। प्रधानमन्त्री नरेन्द्रमोदी सर्वकारस्य प्रमुखत्वेन राज्य-राष्ट्रसेवयोः पञ्चविंशतितमे वर्षे प्रवेशं कुर्वन् एतानि वक्तव्यानि अयच्छत्। जनान् प्रति कृतज्ञतां प्रकटयन् श्रीमोदी अवदत् यत्, भारतं वैश्विक-अर्थव्यवस्थायां उज्ज्वलस्थानरूपेण वर्तते। सामाजिक- प्रसारमाध्यमे सः अवदत् यत्, देशे प्रमुखाः स्वास्थ्यसेवाः, सामाजिक-सुरक्षा-योजनाश्च सन्ति। सः सूचितवान् यत् सर्वकारेण विस्तृतानि परिष्काराणि स्वीकृतानि सन्ति अथ च सर्वक्षेत्रेषु भारतम् आत्मनिर्भरं कर्तुं जनभावना अस्ति च, या हि **"गर्व से कहो, ये स्वदेशी है"** इत्यस्य स्पष्टम् आह्वानम् प्रतिबिम्बयति।

## प्रधानमन्त्री-मुम्बई यात्रा

मुम्बई-नगरस्य द्विदिवसीययात्रायां प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नगरे प्रमुखानां परियोजनानां उद्घाटनम् क्रियते। भारतं वैश्विक-विमानयान-केन्द्ररूपेण परिवर्तयितुं स्वस्य दूरदृष्टेः अनुगुणं, प्रधानमन्त्री, पंचाशतधिक षड्शतोत्तर नवदश सहस्र कोटिरूप्यकाणां व्ययेन निर्मितस्य भारतस्य बृहत्तमस्य ग्रीनफील्ड्-विमानस्थानकस्य, नूतनस्य नवी-मुम्बई-अन्ताराष्ट्रिय-विमानस्थानकस्य च प्रथम-चरणस्य उद्घाटनं करिष्यति। एतदतिरिच्य, प्रधानमन्त्री मोदी मेट्रो-मार्ग-इत्यस्य अन्तिमं चरणं जनेभ्यः समर्पयिष्यति, यत् सम्पूर्णे दक्षिण-मुम्बई-नगरे, प्रमुखेषु व्यापारकेन्द्रेषु च अविरामं -सम्पर्कं प्रयच्छति। सः 'मुम्बई-वन्' इति भारतस्य प्रथमं एकीकृतं सार्वजनिक-परिवहन-दूरभाष यन्त्रं अपि उद्घाटयिष्यति, येन परिवहन-निर्वाहकानां संयोजनं भविष्यति।

## प्रधानमन्त्री कीर् स्टार्मर-भारतयात्रा

युनाइटेड किंगडम देशस्य प्रधानमन्त्री कीर् स्टार्मर् अद्य आरभ्य भारतदेशस्य द्विदिवसीययात्रां करिष्यति। प्रधानमन्त्री स्टार्मर् इत्यस्य एषा प्रथमा भारतदेशस्य आधिकारिकयात्रा भविष्यति।

**<u>ऋतुवार्ताः</u>**

भारतस्य ऋतु-विज्ञान-विभागेन अद्य असम, मेघालय, मिज़ोरम, त्रिपुरा, नागालैण्ड, मणिपुर, कर्नाटक, तमिलनाडु, पुद्दुचेरी, करैकल्, भारतस्य पूर्वोत्तरराज्येषु च प्रचण्डतोऽधिकवृष्टिः भविष्यतीति पूर्वानुमानं कृतम्। विभागेनानेन कोंकण, गोवा, लक्षद्वीप, मध्यमहाराष्ट, रायलसीमा, इत्येतेषु प्रदेशेष्वपि विद्युल्लतापुरस्सरं, वायुवेगेन च सह वर्षया तापमाने अपचितिः भविष्यति।

**<u>क्रिकेट-आई.सी.सी.</u>**

अन्ताराष्ट्रियक्रिकेट्-परिषद् (आई.सी.सी.) 2025 सेप्टेम्बर्-मासस्य सर्वोत्कृष्टः क्रीडकः इत्यस्य पुरस्कारस्य नामाङ्किकतानां सूचीं अघोषयत्। पुरुषाणां वर्गे भारतात् अभिषेकशर्मा, कुल्दीप् यादव् च नामाङ्किकताः सन्ति, तृतीयः नामाङ्किकतः क्रीडकः जिम्बाब्वे-देशात् ब्रियान् बेनेट् अस्ति। महिला-वर्गे भारतस्य, पाकिस्तान्-देशस्य, दक्षिण-आफ्रिका-देशस्य च तिस्रः क्रीडकाः पुरस्कारार्थं नामाङ्किकताः सन्ति।